International Journal of Sanskrit Research 2021; 7(4): 248-252

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(4): 248-252
© 2021 IJSR
www.anantaajournal.com
Received: 28-05-2021
Accepted: 30-06-2021

**Papan Chanda**
Research Scholar,
Department of Sanskrit,
Sidho-Kanho-Birsha University,
Purulia, West Bengal, India

**Corresponding Author:**
**Papan Chanda**
Research Scholar,
Department of Sanskrit,
Sidho-Kanho-Birsha University,
Purulia, West Bengal, India

# विक्रमोर्वशीयदृश्यकाव्ये वैदिकसंस्कारस्य प्रभावः

**Papan Chanda**

**सारांश**

मानवजीवनस्य परिस्कृतं रूपं संस्कारनाम्ना अभिधीयते। इदं जीवनं यदा शुद्धमाचरणं करोति तदा जनाः वदन्ति अयं बालकः आचारयुक्तो भवति। संस्कारितश्च अस्ति। अतः अनेन ज्ञायते यद् संस्कारो हि गूढान्तराधानमुच्यते। चरकऋषेः वचनमिदं प्रमाणी क्रियते यद् – मनुष्यजीवने यद् परिवर्तनं भवति तद् परिवर्तनं संस्कारकारणादेव भवति। अयं संस्कारः जन्मजन्मान्तरयोः सञ्चितपुण्यकारणात् नवीनजीवने उद्भाषितो भवति। संस्कारो हि नाम गुणस्याधानः। यदा मनुष्यस्य शरीरे गुणस्याधानं भवति तदा तस्य जीवने किञ्चिद् यथार्थपरिवर्तनं दृश्यते। तद् परिवर्तनं संस्कारगम्, संस्कारिताः जनाः समाजे यद् किमपि कार्यं कुर्वन्ति तस्य प्रशंसा भवति। अयं संस्कारः जन्मजन्मान्तरेण साकं सम्बध्यो भवति। पुनश्च केचन् ऋषयः वदन्ति यद् अस्य संस्कारस्य सम्बन्धः कर्मणा साकं वर्तते। कर्मजन्यं फलमेव संस्कारस्य परिचयं कारयति। कर्मणा साकं सम्बन्धकारणात् संस्कारोऽयं प्रतिष्ठितो भवति। वैदिकऋषयः मानवजीवनसुव्यवस्थितकरणाय वैदिकसंस्कारस्य दर्शनमुक्तवन्तः। एते संस्काराः वैज्ञानिकपद्धत्या समाजे प्रचलिताः सन्ति। वैदिककालादारभ्य अद्यावधिपर्यन्तं एतेषां संस्काराणां पालनं सर्वैः हि स्वीक्रियते। मानववजीवनस्याधारभूतः संस्कारो वर्तते। कस्यापि मनुष्यस्य कुललोकयोः परम्परया यानि कार्याणि क्रियन्ते तेषां कार्याणां सम्यक्प्रकारेण सम्पादनार्थं गुणशीलसौन्दर्य्यपारम्परिकशिष्टाचाराणामावश्यकता अनुभूयते। तत्र कार्यस्य सुष्टुसम्पादनाय संस्काराः परोक्षरूपेण प्रेरयन्ति। तेषां संस्काराणां सहाय्येनैव कोऽपि मनुष्यः स्वजीवने शोभनं कार्यं कर्तुं शक्नोति। 'कीर्ति यस्य स जीवति' इति उक्तेः मूले जन्मजन्मान्तरयोः सञ्चितपुण्यरूपेण यः संस्कार वर्तते स एव प्रारब्धरूपेण कार्यं करोति। संस्कारविषये शतपथब्राह्मणे उच्यते यथा –

'स इदं देवेभ्यो हविः संस्कुरु साधु संस्कृतं संस्कुर्वित्यैवैतदाह' ।[1]

कालिदासकृतदृश्यकाव्येषु संस्कारस्य चर्चा विशदरूपेण विद्यते। अत्र कर्मजन्यफलं भोगाय मानवजीवनं संरक्षणाय च संस्कारस्य प्रतिष्ठा कालिदासेन कृता।विक्रमोर्वशीयदृश्यकाव्ये येषां संस्काराणां चर्चा विद्यते। तेषां यथाक्रमेण अत्र विवेचनं क्रियते।

**कुटशब्दः** कालिदास, विक्रमोर्वशीयम्, संस्कार, वैदिकसंस्कार

## प्रस्तावना

मानवजीवनस्याधारभूतः संस्कारो वर्तते। कस्यापि मनुष्यस्य कुललोकयोः परम्परया यानि कार्याणि क्रियन्ते तेषां कार्याणां सम्यक् प्रकारेण सम्पादनार्थं गुणाद् पारम्परिकशिष्टाचाराणामावश्यकता अनुभूयते। तत्र कार्यस्य सुष्ठु सम्पादनाय संस्काराः परोक्षरूपेण प्रेरयन्ति।

तेषां संस्काराणां सहाय्येनैव कोऽपि मनुष्यः स्वजीवने शोभनं कार्यं कर्तुं शक्नोति। 'कीर्ति यस्य स जीवति इति उक्तेः मूले जन्मजन्मान्तरयोः सञ्चितपूण्यरूपेण यः संस्कार वर्तते स एव प्रारब्धरूपेण कार्यं करोति। अतो मनुष्यजीवनस्याधारभूतः संस्कारो वर्तते इति। एते संस्कारा वैदिकसाहित्ये लौकिकसाहित्ये च भिन्नभिन्नरूपेण प्रतिपादिताः सन्ति।

'मुण्डे मुण्डे मतिर्भिन्ना' ।[2]

इति उक्त्यानुसारं विभिन्नेषु ग्रन्थेषु संस्काराणां संख्या भिन्नभिन्नरूपेण च दृश्यते प्राप्यते च। यद्यपि ऋषयोऽष्टचत्वारिंशत् संस्कारा आमनन्ति तथापि मतवैभिन्नकारणात् षोडश संस्कारा एव प्रमुखरूपेण प्रतिपादिताः सन्ति। परञ्च केषाञ्चिन् मते त्रयोदश संस्कारा केचन जना एकादश संस्कारा स्वीकुर्वन्ति। अस्मिन् विषये कुललोकयोः या परम्परा वर्तते सा एव परम्परा इदानीं पर्यन्तमपि कार्यं करोति। उपर्युक्तसंस्कारा ये सन्ति तेषां प्रभावः कालिदासीयदृश्यकाव्य तथा विक्रमोर्वशीयत्रोटकेऽपि प्रत्यक्षरूपेण दृश्यते। अत्र कर्मजन्यफलं भोगाय मानवजीवनं संरक्षणाय च संस्कारस्य प्रतिष्ठा कालिदासेन कृता। तेषां वर्णनं निम्नधा क्रियते–

**अध्ययनप्रक्रिया (Method of the Study)**

यद्यपि अध्ययनमिदं विश्लेषणात्मकं वर्तते तथापि अत्र अध्ययनाय आधुनिकवैज्ञानिकपद्धत्याः अनुसरणं कृतम्। अत्र विषयवस्तुः विश्लेषणेन अध्ययनमिदं कृतम्
(Qualitative Content Analysis) । अत्र उपलब्धानां तथ्यानां सिद्धान्तानां च एकत्रीकरणेन रेखांशनिर्वाचनेन नवीनप्रकारेण च तत्प्रतिपादनम् ।

**गर्भाधानसंस्कारः**

'गर्भस्य आधानं वीर्यस्थापनं स्थिरीकरणं यस्मिन् येन वा कर्मणा तद् गर्भाधानम्' ।[3]

अत्र दिव्यश्रेष्ठसन्तानोत्पादनाय मनुष्यः शास्त्रोक्तविधिनानुसारं गर्भाधानं तिथि-वार-नक्षत्र-योग-करण-मुहूर्त-चन्द्रतारा इत्यादिकं दृष्ट्वा गर्भाधानसंस्कारं सम्पादयति। अत्र वक्तुं शक्यते यद् ऋतुस्नाता धर्मपत्नेः गर्भेः पतिः सम्भोगमाध्यमेन वीर्यं वीजरूपेण प्रतिष्ठापयति। तस्यैव क्रियायाः नाम गर्भाधानं वर्तते।
अथर्ववेदे गर्भाधानविषये उच्यते यथा –

"आ ते योनि गर्भ एतु पुमान् वाण् इवेषुधिम्।
आ वीरोऽत्र जायतां पुत्रस्ते दशमास्यः" ।[4]

'आत्मा वै जायते पुत्रः' इति पितुः शरीरे ये गुणा विद्यमानाः सन्ति तेषां गुणानाम् आधानं पुत्रस्य शरीरे भवति। पुत्रः पितासदृशः एवाचरणं करिष्यतीति मत्वा अस्य संस्कारस्य विधानं वर्तते। यथा विक्रमोर्वशीयनाटके पुरूरवापुत्रस्य आयुः विचारविषये आश्चर्यचकितोऽभूत्। तत्र कारणमिदं यद् उर्वशी गर्भवती अस्ति न वा इति न परिलक्षितः। एतस्मात् कारणात् तेन उच्यते –

'न च मया गर्भव्यक्तिरालक्षिता' ।[5]

अनेन ज्ञायते यत् तत्कालीनसमये गर्भाधानसंस्कारस्य प्रचलनमासीत्।

**पुंसवनम्**

अयं पुंसवनसंस्कारः पुत्रोत्पत्तये क्रियते। अथर्ववेदस्य सप्तमकाण्डस्येकादशसूक्तस्य प्रथममन्त्रे पुंसवनशब्दस्य प्रयोगः प्राप्यते।[6] अस्य शब्दस्य व्युत्पत्तिः एवं कर्तुं शक्यते। पुमान् सूयते यस्मात् इति पुंसवनम्। अर्थात् अनेन संस्कारेण पुत्रोत्पत्तिः जायते। अस्य संस्कारस्य कालनिर्धारणे किञ्चिद् मतवैभिन्र्यं दृश्यते। गर्भस्थशिशोः तृतीये मासे पुंसवनसंस्कारस्य विधानं वर्तते। पुत्रोत्पत्तिः सर्वैः कामयते। अत्र पुत्रहीनता सामाजिकदोषरूपेण परिलक्ष्यते। यथा शूद्रकेऽपि मृच्छकटिके उच्यते –

'शून्यमपुत्रस्य गृहम्' ।[7]

एवमेव यदा जनकनन्दिनी जानकी सीता गर्भवती आसीत् तदा ऋष्यश्रृङ्ग आश्रमाद् अष्टावक्रमाध्यमेन अरुन्धत्या शाकं माताकौशल्या प्रभृतयः सीताम् आशीर्वचांसि प्रयक्षन्ति। तत्र यशस्वीपुत्रोत्पत्तिः अभिलाषा तासां मनसि विद्यते। पुं नरकात् त्रायते इति पुत्रः। स एव वंशपरम्परायाः सञ्चालनं सम्यकप्रकारेण करिष्यति इति मत्वा सर्वेऽपि श्रेष्ठपुरुषा वैदिकरीत्या तस्मिन् समये पुंसवनसंस्कारं कुर्वन्ति स्म। वैदिकरीत्यानुसारेण महाकविना पुंसवनसंस्कारस्य वर्णना क्रियते। विक्रमोर्वशीयदृश्यकाव्येऽपि पुंसवनसंस्कारस्य सूचना परिलक्ष्यते। यथा दृश्यते –

'असन्तानत्वं वर्जयित्वा न किमप्यस्य हीनम्' ।[8]

अत्र राज्ञः पुरूरवायाः केवलं सन्तानं नास्ति। प्रसङ्गानुसारेण महाकविना अत्र पुंसवनसंस्कारस्याभासं संसूचयन्ति।

**जातकर्मसंस्कारः**

अयं संस्कारो वालकस्य जन्मसमये नाभिच्छेदनात् पूर्वं क्रियते। यदि काचन् समस्या कारणात् जातकर्मसंस्कारः समयानुसारं न भवति तर्हि तद् दिवसाभ्यन्तरे एव करणीयः। अस्य संस्कारस्य मूलोद्देश्यं भवति शिक्षणरक्षणभरणव्यापारः सम्यक्तया भवेत्। अस्मिन् संस्कारे जातकस्य पिता वैश्वानरं प्रति स्वकीयं कर्तव्यं ज्ञापयन् द्वादशपात्रेषु पुरोडाशं स्थाप्य वैश्वानराय समर्पयति। पुत्रस्य कृते दधिमधुघृतञ्च स्वर्णपात्रे संमिश्रयः खादयति। अनेन तस्य शरीरे ऊर्जायाः सञ्चारो भवति। अनेन द्रव्यत्रयेण कस्य आधानो भवति इत्यस्मिन् विषयेऽपि ऋषयः स्वकीयमतं प्रस्तुतवन्तः। यथा दधिद्रव्येण इन्द्रियशक्तिः सम्वर्धयति। घृतेन पशुतेजः मधुना औषधये रसान् प्राप्यते। अनेन पीतवातकफयाञ्च रोगान् शमयति। अनेन प्रकारेण विक्रमोर्वशीयेऽपि पुरूरवा पुत्रस्य संरक्षणाय जातकर्मसंस्कारः सम्पादितः। अयं संस्कारः च्यवनऋषिणा सम्पादितः। यथा उच्यते –

> ‘यत् क्षत्रियकुमारस्य जातकर्मादिविधानं तदस्य भगवता च्यवनेनाशेषमनुष्ठितम्’ ।[9]

अनेन प्रतीयते यत् कालिदाससमये संस्काराणां विशिष्टं महत्वमासीत्। तत् कालीनसमाजे वैदिकसंस्काराणां प्रचलनं कुललोकयोः परम्परामधीकृत्य भवति स्म।

**नामकरणम्**

जातकर्मसंस्कारमनन्तरमेव नामकरणसंस्कारः क्रियते। कस्यापि जातकस्य जन्मानन्तरं सामाजिकव्यवहारज्ञानाय नामकरणसंस्कारः अनुष्ठीयते। यथा ज्योतिषशास्त्रे उच्यते –

> ‘नामाखिलस्य जगतः व्यवहारहेतु नाम्नैव कीर्तिं लभते मनुष्यः’ ।[10]

अर्थात् नाम्ना तद् विशिष्टगुणस्य आधानमपि भवति। संज्ञा द्विविधा भवति। एका अन्वर्थसंज्ञा,तद् भिन्ना संज्ञा अत्र अन्वर्थसंज्ञा का भवति ? यस्य यादृशी संज्ञा वर्तते तादृशी एव जातकस्य कर्म वर्तते। इयं संज्ञा अन्वर्थसंज्ञा वर्तते। द्वितीया संज्ञा सा अस्ति यत्र जातकस्य नामानुसारं कार्यं न वर्तते यथा कस्यापि नाम वर्तते सत्यप्रकाशोऽस्यान्वर्थसंज्ञा भविष्यति सः सदा सत्यमेव प्रकाशयति अर्थात् यथार्थं भाषणं करोति, परञ्च यदि सः सर्वदा असत्यं वदति तर्हि सा संज्ञा तद् भिन्ना भविष्यति। अतो वैदिकयुगाद् आरभ्य अद्यावधिपर्यन्तं जातकस्य जन्मसमयानुसारं तिथिवारनक्षत्रमुहूर्तादिकं दृष्ट्वा नामकरणं सम्पद्यते। महाकवेः कालिदासस्य दृश्यकाव्येऽपि कुलपरम्परानुसारेण नामकरणसंस्कारस्य विषयः परिलक्ष्यते।

विक्रमोर्वशीयदृश्यकाव्ये पुरूरवायाः पुत्रस्य नाम आयुषो भवति। शत्रूणां आयुः हरणार्थं आयुष इति नाम महाकविना अत्र क्रियते। यथा दृश्यते –

> “उर्वशी सम्भवस्यायमैलसूनोर्धनुर्भृतः।
> कुमारस्यायुषो बाणः प्रहर्तुद्विषदायुषाम्” ।।[11]

अत्र प्राचीनपरम्परानुसारेण तेन पात्र-पात्रीणां नामकरणं क्रियते।

**उपनयनसंस्कारः**

अयं संस्कारः विद्याध्ययनाय भवति। अस्य अर्थोभवति उपसमीपे आचार्यादिनां वटोर्नयनं प्रापणमुपनयनम्। अर्थात् बालकम् आचार्य-सन्निधौ नेतव्यः। अयं संस्कारः ब्राह्मणस्य अष्टमे वर्षे क्षत्रियस्य एकादशे, वैशस्य द्वादशे अयं संस्कारः कर्तव्यः। आश्वलायनगृह्यसूत्रे उच्यते यथा –

> “अष्टमे वर्षे ब्राह्मणमुपनयेत्। एकादशे क्षत्रियम्। द्वादशे वैश्यम्। आ षोडशाद् ब्राह्मणस्यानतीतः कालः। आ द्वाविंशत्क्षत्रियस्य। आ चतुर्विंशद्वैश्यस्य” ।[12]

धार्मिकः आध्यात्मिकविकाशाय उपनयनसंस्कारस्य महत्त्वमुल्लेखयोग्यं वर्तते। अनेन संस्कारेण मनुष्यः नियमवद्धजीवने प्रवेशयति। अस्य संस्कारस्य विशिष्टं महत्त्वं वर्तते। कविकालिदासेन स्वदृश्यकाव्ये एवं प्रकारेण विचारः क्रियते।

उपनयनसंस्कारः यज्ञोपवीत् संस्कारनाम्ना अभिधीयते। विक्रमोर्वशीयदृश्यकाव्ये यज्ञोपवीत-शब्दस्य व्यवहारः परिलक्ष्यते। अस्य संस्कारस्य प्रयोगेन महाकविः वेदविहितोपनयनसंस्कारस्य महत्त्वं प्रतिष्ठापयति।

> गोरोचना-निकष-पिङ्ग-जटाकलापः
> संलक्ष्यते शशिकलामलवीतसूत्रः।[13]

**विद्यारम्भसंस्कारः**

मानवजीवनं एक व्यवहारः अस्ति। व्यवहारस्य मूलमस्ति ज्ञानम्। ज्ञानस्य मूलम् अस्ति शिक्षा। अतः सर्वेऽपि स्वकीयं बालकं शिक्षणार्थं प्रेरयन्ति। तत्र बालकस्य पञ्चवर्षादारभ्य विद्यारम्भसंस्कारः अनुष्ठीयते। तस्मिन् समये बालकः अक्षरारम्भं करोति। कथमिति चेत् न क्षरतीति अक्षरः। अक्षरः ब्रह्मसदृशो भवति। तस्य कदापि क्षरणं न भवति। एतस्मात् कारणाद् अक्षरारम्भः क्रियते। इत आरभ्य समावर्तनपर्यन्तं स विद्याग्रहणं करोति।

अष्टादशविद्यानां ग्रहणं जनाः क्रमेण समयानुसारञ्च कुर्वन्ति स्म। विक्रमोर्वशीयेऽपि पुरुरवा उर्वशीश्च विद्यारम्भसंस्कारं सम्पादितौ –

'एष गृहीतविद्या आयुः साम्प्रतं कवचहरः संवृत्तः' ।[14]

**विवाहसंस्कारः**

वि-उपसर्गपूर्वकं वह् धातोः विवाहशब्दः निष्पन्नो भवति। यस्यार्थः विशेषेण भारम् वाहयति इति विवाहः। यः कश्चन् पुरुषः वर्तते तस्य यावत् पर्यन्तं विवाहसंस्कारः न सम्पद्यते तावत् पर्यन्तं सः अपूर्णो भवति। कथमिति चेत् मानवजीवने पुरुषार्थचतुष्टयम् ऋषिभिः निर्धारितम्। अत्र धर्मार्थकाममोक्ष इति चतुर्णां सम्पूर्णजीवने आवश्यकता भवति। अतो धर्मार्थकामाः इति त्रयाणां पुरुषार्थाणां सम्यक् प्रकारेण सम्पादनार्थं धर्मपत्न्याः अवश्यकता अनुभूयते। यथा उच्यते –

'विना पत्नी कथं धर्म आश्रमाणां प्रवर्तते' ।[15]

अतः सर्वविधशुभकार्येषु धर्मपत्नी तिष्ठति। कालिदासेनापि स्वकीयदृश्यकाव्येषु विवाहसंस्कारस्य भारतीयमर्यादानुसारं उपस्थापनमक्रियत। तेन कुत्रापि अनैतिकविवाहसंस्कारस्य चर्चा न कृता।

'स्वधर्मे निधनं श्रेयः परधर्म भयावहः' ।[16]

इति गीतावचनानुसारं स्वधर्मे एव संस्कारादिसम्पादनं आचारसंहिता आसीत्।

'ययोरेव समं वित्तं ययोरेव समं कुलं तयोः मैत्रीविवाहश्च न तु पुष्टविपुष्टयोः' ।[17]

सकुलवंशपरम्परानुसारं विवाहसंस्कारः विधिवद् वैदिकपरम्परया जनाः सम्पादयन्ति स्म। अष्टविधविवाहसंस्काराणां यथोचितं स्थानं समाजे आसीत्। प्राचीनकाले वहुविवाहस्य नानानिदर्शनं परिलक्ष्यते। वहुविवाहसंस्कारः न केवलं वैदिकसाहित्ये अपितु कवेः दृश्यकाव्येऽपि परिलक्ष्यते। विक्रमोर्वशीयदृश्यकाव्ये काशीनरेशदुहिता औशिनारी तथा उर्वशी च पुरूरवायाः पत्नीरूपेण उल्लेखः दृश्यते।

**अन्त्येष्टिसंस्कारः**

मनुष्यजीवनस्य अभिलषितपुरुषार्थचतुष्टयेषु अन्तिमपुरुषार्थरूपो मोक्षो वर्तते। धर्मार्थकामत्रिविधैः पुरुषार्थैः कार्याणि संसाध्य पुरुषार्थचतुष्टयस्य प्राप्तये सर्वेऽपि मनुष्याः प्रयतन्ति। यद्यपि मृत्युविषये जनानां मनसि भयोत्पन्नं जायते। भयात् कारणात् ते मृत्युं न वाञ्छन्ति। परञ्च सत्यमिदमेव यद् 'जातस्य ध्रुवं मृत्युः ध्रुवं जन्ममृतस्य च' इति सत्यमस्ति। मोक्षप्राप्तये मनुष्याः स्वजीवने शुभकर्माणि कुर्वन्ति। येन मुक्तिः भवेत्। इहलौकिकपारलौकिकयोः अभ्युदयः कामनां कर्तुं यः अयं संस्कारः जनैरनुष्ठीयते "निषेकाद्याश्मशानान्ता तेषां वै मन्त्रतः क्रिया" इति स्मृतिवचनानुसारं वैदिकविधिविधानेन अन्तिमपुरुषार्थप्राप्तये जनाः प्रयासं कुर्वन्ति। कालिदासेनापि स्वकीयदृश्यकाव्येष्वनेकेषु स्थलेषु मानवजीवनस्य परमगतिः मोक्षो वर्तते इति उद्घोषितः।

**उपसंहारः**

कथनस्याभिप्रायोऽयं वर्तते यत् सर्वेऽपि प्राणिनः प्रातः कालादारभ्य रात्रिशयनपर्यन्तं स्व स्व कार्यं संसाधयन्ति। सर्वेषु जीवेषु चिन्तनशीलजीवो मनुष्य वर्तते। अस्य मनुषस्य कर्तव्यं किं भवेत्? इति विचारणीयो विषयः ऋषिभिः समक्षम् आसीत्। अतः सृष्टिप्रपञ्चस्य प्रथमावाणी यः वेदः वर्तते तदनुकूलं मनुष्याणां कृते आचारसंहितां निर्मीय उपस्थापितवन्तः। एते वैदिकसंस्काराः मनुष्यस्य कर्तव्याकर्तव्ययोः बोधं कारयन्ति। यस्य यादृशः संस्कारो भवति सः तादृशं कर्म करोति। कर्माणुसारेण मोक्षप्राप्तिः भवति। किं वा इहलौकिकपारलौकिकयोः उभयोः सुखविधानं शान्तिसमृद्धिश्च संस्कारानुकुलमेव प्राप्यते। वैदिकज्ञानं प्रति श्रद्धां निवेदयन आधुनिकसमाजः सुसंस्कृतो भवेदेतदर्थं कालिदासेन संस्कारस्य महत्त्वं प्रतिपादितम् । अतः कालिदासेनापि वैदिकसंस्काराणां यद् वैज्ञानिकं महत्त्वं वर्तते तद् प्रस्तूय समाजस्य महान् उपकारः कृतः।

**शोधसहायकग्रन्थसूची**


1. श.ब्रा. – 1/1/4/10
2. वायुपुराण
3. दयानन्दसंस्कारविधि, पृ.- 31
4. अ.सं. – 3/23/2
5. वि.म. – 5म अंक, पृ – 230
6. मृ.क. – 1म. अंक,(1/8)
7. विक्रमोर्वशीयम्, वाख्याकार परमेशवरदीन पाण्डेय & अवनिकुमार पाण्डेय । वाराणसी : चौखाम्वा सुरभारती प्रकाशन,२०१३ । 5म. अंक, पृष्टा - 219
8. विक्र.म. – 5म. अंक, पृ - 236
9. मुहूर्तचिन्तामनि, नामकरणसंस्कारप्रकरण
10. विक्रमोर्वशीयम्, वाख्याकार परमेशवरदीन पाण्डेय & अवनिकुमार पाण्डेय । वाराणसी : चौखाम्वा सुरभारती प्रकाशन,२०१३ – 5/7, पृष्टा - 229
11. आश्व.गृ.सू. – 1 अध्याय -16
12. विक्र.म. – 5/19 पृ - 253
13. विक्र.म. – 5म. अंक, पृ - 236
14. धर्मशास्त्र
15. श्रीमद्भागवदगीता – कर्मयोग (3/35)
16. सुभाषितानि
17. Belvalkar, S.R.(Ed.). The Abhijnasakuntalam. New Delhi: Kalidas Sahitya Academy, 1965. English.
18. Bhattacharjea, Ramsadaya. A Tale from the Vikramorbashee of Kalidas. Calcutta: The Sanskrit press, 1859. English.
19. patra, benudhar. New Horizons in History $ Culture. Delhi: Pratibha Prakashan, 2015.
20. त्रिपाठी, ब्रह्मानन्द (सम्पादित)। कालिदास-ग्रन्थावली। वाराणसी: चौखाम्वा सुरभारती प्रकाशन्, 2014
21. पाण्डेय, परमेश्वरदीन (सम्पादित) । विक्रमोर्वशीयम् । वाराणसी: चौखाम्वा सुरभारती प्रकाशन्, 2013।